श्रीविष्णु अपराजिता माला मन्त्र*

विनियोगः – ॐ अस्य श्रीविष्णु अपराजिता महाविद्या माला मन्त्रस्य ईश्वर ऋषिः। पंक्तिश्छन्दः। श्रीविष्णु-अपराजिता-महाविद्या-देवता। ॐ हां ब्राँ बीजं। ॐ ह्रीं ब्रीं शक्तिः। ॐ हूँ ब्रूँ कीलकं। मम सर्वाभीष्ट-सिद्ध्यर्थ श्रीविष्णु-अपराजिता-महाविद्या-मालामन्त्र-जपे विनियोग।

ऋष्यादिन्यासः– ईश्वर ऋषये नमः शिरसि। पंक्तिश्चछन्दसे नमः मुखे। श्री विष्णु-अपराजिता-महाविद्या देवतायै नमः हृदये। ॐ हाँ ब्राँ बीजाय नमः गुह्ये। ॐ ह्रीं ब्रीं शक्त्यै नमः पादयोः। ॐ हूँ ब्रूँ कीलकाय नमः सर्वाङ्गे।

करन्यासः – ॐ हाँ ब्राँ महाविद्यायै नमः अंगुष्ठाभ्यां। ॐ ह्रीं ब्रीं महामायायै नमः तर्जनीभ्यां। ॐ हूँ ब्रूँ महामेधायै नमः मध्यमाभ्यां।ॐ हैं ब्रैं महामन्त्रायै नमः अनामिकाभ्यां। ॐ हौं ब्रौं महासिद्धायै नमः कनिष्ठिकाभ्यां। ॐ हः ब्रः महाऽऽपराजितायै नमः। करतलकरपृष्ठाभ्यां।

षडङ्गन्यासः – ॐ हाँ ब्राँ महाविद्यायै नमः हृदि। ॐ ह्रीं ब्रीं महामायै नमः शिरसि। ॐ हूँ ब्रूँ महामेधायै नमः शिखायां। ॐ हैं ब्रूँ महामन्त्रायै नमः कवचयोः। ॐ हौं ब्रौं महासिद्धायै नमः नेत्राभ्यां। ॐ हः ब्रः महाऽऽपराजितायै नमः अस्त्राभ्यां।

दिग्बन्ध : ॐ ह्रौं सर्वभूतानिवारणाय शार्ङ्गाय सशरायास्त्रराजाय सुदर्शनाय हुँ फट् ह्रीं ॐ स्वाहा।

॥ ध्यानम् ॥

चतुर्भुजां पीतवस्त्रां शङ्खचक्रगदाधराम्।
मुक्ताऽऽभरण-भूषाढ्यां पद्मनेत्रां द्विलोचनाम्॥१॥
पीतगन्धविलेपाङ्गी पीताभरणभूषिताम्।
पद्महस्तां सुपद्माङ्गीं गरुडासनसंस्थिताम्॥२॥
दैत्यदानवसंहारी महाविष्णुवरप्रदाम्।
ध्याये महाविद्यामहं विष्णुसाम्राज्यदायिनीम्॥३॥

मालामन्त्रः

ॐ ऐं ह्रीं श्रीं नमः कमलदलविपुलनयनाभिरामाय श्रीरामचन्द्राय ॐ ह्रीं नमो नारायणाय। ॐ श्रीं नमो भगवते वासुदेवाय। ॐ क्लींऽनंताय सहस्त्रशीर्षाय क्षीरोदार्णवशायिने शेषभोगीन्द्रपर्यङ्कशयनाय वाहनाय अजाय अजिताय पीतवाससे। वासुदेव सङ्कर्षण प्रद्युम्न अनिरुद्ध हयग्रीव वराह नारसिंह वामन त्रिविक्रम राम राम वरप्रद! नमोऽस्तु असुर-दैत्य-दानव-यक्ष-राक्षस-भूत-प्रेत-पिशाच-कूष्माण्ड-सिद्ध-योगिनी-शाकिनी-काकिनी-राकिनी-लाकिनी-गण-गन्धर्व-किन्नर-किम्पुरुष-

Scanned by CamScanner

विद्याधर-चारण-महोत्पर-महोरग-महामारी-चतुःषष्टि-कोटि-योगिनी षट्-पञ्च-कोटि-कात्यायनी-नव-कोटि चामुण्डा-सहमातृका-गण-सुरासुर-गण-खेचर-भूचराद्यष्ट-भैरव वेताल-स्कन्द-पुरोगान् नक्षत्रान् इह पर-जन्म-ऋण-वैर ब्रह्महत्यादि ब्रह्म-राक्षस-समन्धादि कृत्या कट कुट कपट कापट्य परयन्त्र परतन्त्र परमन्त्र परशास्त्र प्रयोगादि परानुष्ठान परचक्रं परचक्रं परराष्ट्र दुष्टाऽऽमात्य दुष्टनृपति दुर्भिक्ष्य दुःस्वप्न दुर्मेध दुर्वार्ता दुश्चिह्न दुःशकुन दुर्गति दुर्जन खल-क्रूर-चाण्डाल दुष्टरिपु सर्व चोर व्याघ्र वृश्चिक जलचर वनचर धाराकाशचरादि दशदिक्षु बिहारी मम सकल दुष्टान् हन हन पच पच मथ मथ विध्वंसय विध्वंसय छेदय छेदय ताड़य ताड़य जृम्भय जृम्भय द्रावय द्रावय मारय मारय छिंधि-छिंधि भिंधि-भिंधि विद्रावय विद्रावय शङ्खेन चक्रेण वज्रेण वाणेन खड्गेन गदया मुसलेन हलेन भस्मी कुरु कुरु सहस्रबाहो सहस्रप्रहरणायुध जय जय विजय विजय अपराजित अप्रतिहत सहस्रनेत्र! ज्वल ज्वलं प्रज्वल प्रज्वल विश्वरूप मधुसूदन महावराह मत्स्य कूर्म महापुरुष वैकुण्ठ नारायण पद्मनाभ गोविन्द दामोदर हृषीकेश केशव सर्वासुरोत्साद सर्वभूतवशंकर दुःस्वप्नभेदन सर्वयन्त्रमन्त्रप्रभञ्जन सर्वनागमर्दन सर्वदेवमहेश्वर सर्वबन्धविमोक्षण सर्वज्वरप्रणाशन सर्वग्रहनिवारण सर्वपापशमन जनार्दन ! नमोऽस्तु ते नमो नमः स्वाहा ।।

य इमामपराजितां अप्रतिहतां परमवैष्णवी पठति, सिद्धां महाविद्यां जपति पठति श्रृणोति स्मरति ध्यायति कीर्तयति वा न तस्याग्निभयं वायुवज्रोपलाशनि-वर्षावर्ष-भयं न समुद्रभयं वानवग्रहभयं न सर्वचोरभयं श्वापदभयं वा न भवेत् । क्वचिद्रात्र्यन्धकार-स्त्रीराजकुलविषोपविषगरगरदवशीकरण विद्वेषणोच्चाटणमारणमोहनस्तम्भनवधबन्धन भयं वा न भवेत् । एतैंमत्रैर्हृदगतैश्च सिद्धैः। संसिद्धपूजितैः। ॐ आँ ह्रीं क्रों नमस्तेऽस्तु अभये अनघे अजिते अमिते अमृते अपरे अपराजिते श्रीपठितसिद्धे स्मरतिसिद्धे एकोनाशीतितमे उमे ध्रुवे अरुन्धती गायत्री सावित्री जातवेदसि मानस्तोके सरस्वती धरणी धारणी सौदामिनी अदिते दिते विनिते गौरी गान्धारी मातंगी कृष्णे यशोदे सुभद्रे सत्यवादिनी ब्रह्मवादिनी काली कपाली पांचाली काली महाकाली नित्ये भद्रे महेन्द्रे महाराजिनी सार्वभौमचक्रवर्तिनी सर्वदुष्ट शमनी सर्वदुःखविनाशिनी सर्वदारिद्रयप्रशमनीं अपमृत्युमहामृत्युनिवारिणी इन्दिरा कमला लक्ष्मी पद्मे पद्मावती नारायणी सत्योपायप्रकाशिनी स्थलगतं जलगतं अन्तरिक्षगं वा मां रक्ष रक्ष सर्वोपद्रवेभ्यः स्वाहा ।

यस्या प्रणश्यते पुष्पं गर्भो वा पतते यदि।
म्रियन्ते बालका यस्या काकवन्ध्या च या भवेत्।।४।।
धारयेत्तदिमां विद्यामेतैर्दोषैर्न लिप्यते।
रणे राजकुले द्यूते नित्यं तस्य जयो भवेत्।।५।।
शस्त्रं धारयते ह्येषा समरे काण्डदारुणे।

Scanned by CamScanner

गुल्मशूलादिरोगाणां क्षणं नाशयते व्यथां।।६।।
सर्वव्याधिप्रशमनं तेजायुर्बलवर्धनं।
शिरोरोगज्वराणां च नाशिनी सर्वदेहिनां।।७।।
सर्वसिद्धिकरी विद्या सर्वमङ्गलदायिनी।
सर्वविघ्नप्रशमनी साम्राज्यपददायिनी।।८।।

तद्यथा–

ॐ नमो भगवती ह्रीं ऐं श्रीं क्लीं श्रीभगवती वज्रप्रस्तारिणी प्रत्यंगिरे बगले तारे वज्रवैरोचिनी धूमावती छिन्नमस्तके भगमालिनी मां रक्ष रक्ष पालय पालय स्वसुतानिव महदानन्दं कुरु कुरु सर्वमङ्गलाभीष्टं देहि देहि एहि एहि मम हृदयं निवासय निवासय सर्वदुःखदारिद्रयं निर्मूलय निर्मूलय सर्वशत्रून् निकृन्तय निकृन्त्य सर्वविघ्नत्रितापसन्तापमहापापादि सर्वदुष्टोपद्रव भञ्जय भञ्जय हन हन कालेश्वरी गौरी धर्मिणी विद्ये आले ताले माले गन्धे बन्धे पच पच विघ्नान्नाशय नाशय संहारय संहारय दुःस्वप्नान् विनाशय विनाशय रजनी सन्ध्ये दुन्दुभिनादे मानसवेगे शङ्खिनी चक्रिणी वज्रिणी शूलिनी मदिरा घूर्णितनयने तम्बूलानने सहस्रवक्त्रे सहस्रनेत्रे सहस्रपादेऽनन्तरूपधारिणी सहस्रकोटिनाम्ने निगमागमवंद्ये देवी महादेवार्धाङ्गवासिनी उमे अपर्णे पार्वती गिरिजे शाम्भवे । शिवे सदाशिवे हरिहर ब्रह्मेन्द्रादिसकलसुरासुरजननी त्रिभुवनानन्तर व्यापिनी लोकत्रयंस्वामिनी साधकसंजीविनी कालमृत्यु महामृत्युअपमृत्युविनाशिनी विश्वेश्वरी द्रविडी द्राविडी केशवदयिते पशुपतिसंहिते विराञ्चिवनिते दुन्दुभिशमने शबरी किराती मातङ्गी ॐ ह्रां ह्रीं ह्रूं ज्रां ज्रां ज्रां क्रां क्रां क्रां तुरु तुरु मुरु मुरु तुट् तुट् ये मा द्विषन्ति निन्दन्ति प्रत्यक्षं परोक्षं वा सर्वान् तान् दम् दम् मर्द मर्द तापय तापय शोषय शोषय उत्सादय उत्सादय ब्रह्माणी माहेश्वरी वैष्णवी उपेन्द्री वाराही वैनायकी आग्नयी चामुण्डे वारुणी वायव्ये मां रक्ष रक्ष प्रचण्डविद्ये इन्द्रोपेन्द्रभगिनी जये विजये शुक्रसञ्जीवनी विन्ध्यवासिनी कान्हेश्वरी कालरात्री महारात्री मोहरात्री महामाये रेणुके दक्षिण काली चन्द्रपूरनिवासिनी तुरजे योगेश्वरी वज्रयोगिनी जालन्धर-उड्याण-पूर्ण-गिरि-कामरूपपीठनिवासिनी महालक्ष्मी ऋषिश्रृङ्गनिवासिनी करवीरवासिनी शाकम्भरी महामारी सप्तकोटिमहामन्त्रेश्वरी श्रीमत्पञ्चदक्षाशरी षोडशी श्रीचक्रकृतिधारिणी श्री विद्या परमेश्वरी जय जय जगदीश्वरी शान्ति स्वस्ति पुष्टि तुष्टि वर्धिनी कामांकुशे कामदुधे सर्वकामवरप्रद सर्वभूतेषु मां प्रियं कुरु कुरु धनधान्यादिमहदैश्वर्यं मम प्रद प्रद भगभाग्यादि सर्वमङ्गलं देहि देहि पुत्रपौत्रादि सुफलं फलय फलय गजाश्वशिवविकादिसकलराजचिह्नं दापय दापय प्रतिष्ठय प्रतिष्ठय सर्वानन्दायुर्विद्यारोग्यं प्रद प्रद वरद वरद मम रक्ष रक्ष पालय पालय पोषय पोषय तोषय तोषय सञ्जीवय सञ्जीवयानन्दयाऽऽनन्दय सन्तोषय सन्तोषय हर्षय हर्षय ऐं ह्रीं श्रीं क्लीं सर्वजनमनोरञ्जिनी सर्वदुष्टनिर्दलिनी सर्वराजवशंकरी सर्वलोकवंशकरी सर्वदुष्टगतिमुखजिह्वास्तम्भिनी सर्वदुष्टमृगविद्राविणी सर्वस्त्रीपुरुषाकर्षिणी आवेशिनी ज्वालामुखी ज्वालामालिनी शोषिणी सम्मोहिनी हिंगुले हाटकवर्णे योनी

Scanned by CamScanner

महायोनी भगलिंग संयोगिनी कामिनी कामातुरे कौलनी वाममार्गरते वामाचारप्रियकरे शिववामाङ्गवासिनी वाममार्गप्रकाशिनी वामिकानन्दे पञ्चमकारप्रियार्चने सदानन्दे नित्यानन्दकरी नीलपताके महानीले महागौरी महाश्रिये महाचान्द्री महासौरी महामाधुरी चन्द्रार्करश्मे। जाह्नवी यमघण्टे चन्द्रघण्टे कीर्णी चिन्तामणी भैरवी भद्रकाली भवानी भवभयभञ्जिनी भगभाग्यादिसर्वसौभाग्यदायिनी भक्तकामकल्पद्रुमे कामदघे सुरभिसुरोत्पन्ने सर्वकामदुघे भक्तेच्छानन्दकरे धर्मकामार्थमोक्षादिसर्वमनोरथसिद्धिदायिनी यथा मनीषितं कार्यं तन्मय सिध्यन्तु स्वाहा। ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भुभूर्वः स्वः स्वाहा ॐ महः स्वाहा ॐ जनः स्वाहा ॐ तपः स्वाहा। ॐ सत्यं स्वाहा ॐ अतल वितल सुतल रसातल तलातल महातल पाताल सप्त पातालाय स्वाहा ॐ । पूर्वाग्नियाम्यनैर्ऋत्यवरुणवायव्योत्तरमीशान्यूर्ध्वाधो दशदिक्षु सह दिक्पालाय नमः स्वाहा। ॐ पृथ्वी आपाग्निवायु आकाशपञ्चभूतेभ्यः नमः स्वाहा। ॐ ब्रह्माविष्णुहमेश्वरार्कगणेश-दुर्गेन्द्रादिसुरासुराय नमः स्वाहा। ॐ रवीन्दुकुजसौम्यगुरु-शुक्र शनिश्चर-राहु केत्वादि-नवग्रहाय नमः स्वाहा। ॐ ऐं ह्रीं श्रीं क्लीं महाकालीमहालक्ष्मी-महासरस्वती-चामुण्डा-योगिनी-कात्यायन्यादि सर्वशक्तयै नमः स्वाहा यत एवागत पापं तत्रैव प्रतिगच्छतु स्वाहा। ॐ ह्रीं बलाकिनी बले महाबले अतिबले सर्वा असाध्य साधिनि स्वाहा । ॐ ऐं ह्रीं श्रीं क्लीं नमः स्वाहा ।

एतद्विद्या महाविद्या साक्षात् शिवमुखोद्भवं।
विष्णुकर्णोपदेशं तु श्रीशिवः कुरुते स्वयं।।९।।
शिवविद्यां गृहेविष्णुर्शिवशिष्योत्तमो हरिः।
विष्णुजाप्या भविष्यन्ति वैष्णामीपराजिताम्।।१०।।
वश्यं पूर्वमुखे जप्त्वा मारणे दक्षिणे मुखे।
उत्तरे धनकामं तु पश्चिमे व्याधिनाशनम्।।११।।
आकर्षणे तु वायव्ये स्तम्भने ईशतो जपेत्।
नैर्ऋत्यां भूतनाशाय आग्नेयां सर्वकामदम्।।१२।।
पीतासनं पीतवस्त्रं धारयेत् साधकोत्तमः।
पीतगंध पीतपुष्पमथवा रक्तकेवलम्।।१३।।
गुग्गुलं धूपयेन्नित्यं एकान्ते च शिवालये।।
भैरवं शक्तिविष्णुं च गणेशं मंदिरे जपेत्।।१४।।
रात्रौ विशेषफलदं दिवा कार्यं शनैः शनैः।
नदीतीरे तड़ागे च पर्वते गह्वरे जपेत्।।१५।।
भोजनादौ कृतं नित्यं एकद्वयत्रयं तथा।
सर्वसिद्धिवाप्नोति माङ्गल्यं च दिने दिने।।१६।।

Scanned by CamScanner

घृतदीपं तु प्रज्वाल्य अनुष्ठानं कृतं नरः।
मौनी दर्भासनः सिद्धो निर्भयो च जितेन्द्रियः।।१७।।
यस्य पाठप्रसादेन केशवः सर्वसिद्धिवान्।
सर्वसृष्टिप्रपाल्यन्ते महाविद्याप्रसादतः।।१८।।
मत्स्यादिदशदेहं च धृत्वा दैत्यविदारितमः।
यस्य पाठप्रसादेन विष्णुर्वन्द्यं जगत्त्रये।।१९।।
न देयं यस्य कस्येयं कामिकाय प्रदापयेत्।
गुरुभक्ताय दातव्यं पशुभ्यो न च दापयेत्।।२०।।
सहस्त्रावर्तिसिद्धिं च शते चाल्पमनोरथाः।
अयुते च महानन्दं सर्वमङ्गलदायकम्।।२१।।
लक्षावर्ति प्रतिविष्णुर्भविष्यति न संशयः।
नित्य पाठे लभेत् क्षेमं गजादिसर्वसम्पदाम्।।२२।।
सर्वविद्योत्तमा विद्या सर्वमन्त्रोत्तमोत्तमा।
सर्वविघ्नौपशमनी सर्वाभीष्टप्रदायिनी।।२३।।
जपेद् गुरुमुखाद् देवि! शनैः शनैश्च पाठयेत्।
सर्वसिद्धिप्रदा तस्य वैष्णवी अपराजिता।।२४।।
न न्यासं न च ध्यानं च ऋषिछन्दविवर्जितम्।
न होमं तर्पणं कश्चित पाठमात्रेण सिद्धयति।।२५।।
एकान्ते तु जपेन्नित्यं कन्या वा च सुवासिनी।
पूजयेद् वाममार्गेण सर्वासिद्धिमवाप्नुयात्।।२६।।

।। इति श्रीरुद्रयामले श्रीविष्णु अपराजितामहाविद्या सम्पूर्णा शुभं भवतु।।

Scanned by CamScanner